# Skandaproktam Manmathadahakathanam

# સ્કન્દપ્રોક્તં મન્મથદાહકથનમ્

## Document Information

Text title : Skandaproktam Manmathadahakathanam

File name : skandaproktaMmanmathadAhakathanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshAkhyaH dvAdashamAMshaH | adhyAyaH 11 manmathadAhaH | 35-46 ||

Latest update : December 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2024

*sanskritdocuments.org*

# સ્કન્દપ્રોક્તં મન્મથદાહકથનમ્

(શિવરહસ્યાન્તર્ગતે ઈશાખ્યે)

સ્કન્દ ઉવાચ ।

સતીકાન્તચિત્તં પ્રલોબ્ધું વસન્તો
મુદા તત્ર ચક્રે વનં તત્સુકાન્તમ્ ।
ગિરૌ મન્દરે મન્દિરાભે શિવસ્ય
કુન્દારવિન્દાદિસુભૈઃ પ્રકામમ્ ॥ ૩૫॥

પ્રભાકરકરસ્ફુરત્કમલકોશલીનાલયઃ
પરાગરસરઞ્જિતાઃ પરિપતન્તિ પુષ્પદ્રુમાન્ ।
પલાશકુસુમાવલીમિવ શુકાસ્યભાગે તદા
શુકા અપિ મુખાગતાન્ વિગલયન્તિ જમ્બૂમિવ ॥ ૩૬॥

પુરણ્ટકુટજાવલી વિધૃતપુષ્પસત્કોરકૈઃ
શમીકુસુમપાટલીપટલગન્ધબન્ધાનિલૈઃ ।
સુબિલ્વકુસુમોત્કરપ્રભવગન્ધસન્મેદુરો
વિભાતિ કિલ મન્દરઃ કુસુમશાખિસચ્છેખરઃ ॥ ૩૭॥

સુમન્દરસરોવરપ્રથિતતીરમન્દારજૈઃ
વિકાસિતસુમોદ્ધતૈર્વિમલવાતગન્ધાચિતૈઃ ।
સુપર્ણસુમગુચ્છકૈર્વરસુકર્ણિકારોદ્ભવૈઃ
કનત્કનકપુષ્પવચ્છિખરમત્ર ભાભાતિ વૈ ॥ ૩૮॥

ક્રૌઞ્ચાક્રાન્તબકોરુપક્ષચલનૈર્લીનાશ્ચમીનાશ્ચ તે
સારસ્યાઃ સરસીરુહેષુ મધુપાઃ શ્રામ્યન્તિ ભ્રામ્યન્ત્યપિ ।
એવં તત્સુમગન્ધ ગન્ધિતવનં દૃષ્ટ્વા પ્રહૃષ્ટો હરઃ ॥ ૩૯॥

રતિપતિરતિલાઘવેન શમ્ભું
હૃદયે સંવિભેદેઽથ પુષ્પબાણૈઃ ।

કુસુમેષું કુસુમાવલીઢદેહં
યમઘોરાન્ધકશાસનો દદર્શ ॥ ૪૦॥

અનલાક્ષિકોણલક્ષ્યમીશો
ગરકણ્ઠો વ્યદધાદનઙ્ગસંક્ષમેનમ્ ।
ભસ્મીભૂતમનઙ્ગ સુન્દરતનું દૃષ્ટ્વૈવ તત્પૃષ્ઠગાવ
સાસ્રાક્ષી રતિરીશમસ્તુવદસૌ શોકાકુલોત્કણ્ઠિતા ॥ ૪૧॥

રતિરુવાચ ।

હે વાસુદેવનયનાર્ચિત કામદેવ
ભસ્માઙ્ગરાગ વરભૂષિત વામદેવ ।
શ્રીવામદેવ્યમરતોષિત ભૂમિદેવ
પૂજ્ય પ્રસીદ પરમેશ્વર દેવ દેવ ॥ ૪૨॥

મહાદેવ દેવાધિદેવ પ્રસીદ
પ્રસીદ પ્રસીદ પ્રભો કાલકાલ ।
પત્યા વિહીનાં કૃપાપારસિન્ધો
પત્યા સનાથાં કુરુષ્વેશ માં ત્વમ્ ॥ ૪૩॥

વિભૌ મારસર્વસ્વમપ્યન્તરઙ્ગં
સદાખર્વગર્વાધિરૂઢં પ્રમૂઢમ્ ।
મૃડાનીપતે ગૂઢપાદ્ભૂષયોષા-
વિશેષાઙ્ગ કામાઙ્ગનાશ પ્રસીદ ॥ ૪૪॥

સૂત ઉવાચ ।

સત્યાઃ સ્તુત્યા ચ તુષ્ટો ગિરિવરશિખરે સત્યવાચા વિહૃત્ય
પાતિવ્રત્યાનુભૂત્યા સ કિલ પુરહરસ્તામનઙ્ગેન યોજ્યામ્ ।
કાલે દેવ્યાઃ કટાક્ષૈસ્તવ પતિરમરો જાયતે ઇત્યશાત્તાં
શાન્તાં કાન્તપ્રદાનાદ્ગિરિશવરકૃપાપાત્રભૂતાં રતિં તામ્ ॥ ૪૫॥

દેવાસ્તે પ્રયયુઃ સભીતિહૃદયાસ્તે કાન્દિશીકાઃ પ્રભોઃ
ક્રોધાન્ધીકૃતલોચનસ્ય પુરતઃ સ્થાતું ન શેકુસ્તદા ।
ઇન્દ્રાગ્ની યમનિરૃતી ચ વરુણઃ સોમાર્યમાદ્યાઃ યયુઃ
પ્રખ્યાતું વરમન્મથાઙ્ગદહનં દેવેન તદ્બ્રહ્મણે ॥ ૪૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દપ્રોક્તં મન્મથદાહકથનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઈશાખ્યઃ દ્વાદશમાંશઃ । અધ્યાયઃ ૧૧ મન્મથદાહઃ । ૩૫-૪૬ ॥

- .. shrIshivarahasyam . IshAkhyaH dvAdashamAMshaH . adhyAyaH 11 manmathadAhaH . 35-46 ..

Notes:

Skanda સ્કન્દ narrates about the incidence about Manmathadāha મન્મથદાહ via the Fire from the Third Eye of Śiva શિવ as there is an attempt made by Kāmadeva કામદેવ to disturb His Deep State of Dhyāna ધ્યાન.

Rati રતિ tries to appease Śiva શિવ and requests Him to bring her husband back to life, and He kindly grants her the wish.

Proofread by Ruma Dewan

---

*Skandaproktam Manmathadahakathanam*

pdf was typeset on December 28, 2024

Please send corrections to *sanskrit@cheerful.com*